संपूर्ण
कापीत.

स्तोत्र क्र. न.

# रामलीला लता

[illegible] १८।स्तो./१५०

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

## ॥ अथ श्रीरामलीलालता प्रारंभः ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

॥ श्रीगणेशायनमः ॥ श्रीसीतारामचंद्राभ्यांनमः ॥ वक्रतुंडंविभुंविघ्नविनाशंविबुधैर्नुतं ॥ वंदेहंबुद्धिदातारंत्रातारंविश्वतोभयात् ॥ १ ॥
शरदिंदुकुंदकांतांधिषणमुखैःसंस्तुतांविरिंचिसुतां ॥ वीणाक्षसूत्रसलिलजपुस्तकहस्तांनमामिवाग्देवीं ॥ २ ॥ लब्धंयेनरसाविष्करण
सुसौकर्यमत्रभुवनेनं ॥ वंदेदेवंहरिमपिगुरुंचसततंदयानिधिमुदारं ॥ ३ ॥ एकाक्षरगुरुभ्योमेसंतुप्रणतयःसदा ॥ पुंसांयेषांप्रसादेना
क्षरत्वंवागगोचरं ॥ ४ ॥ पापागहशतकोटिश्रीराघवचरितश्रवणेनतः ॥ यस्ययशोत्रिभुवदितस्तमहंवल्मीकजंवंदे ॥ ५ ॥ ल
क्ष्मीहस्तनिषेवितनखतारापतिविराजितंल्हृदितत् ॥ रसनश्यामममृतमधुरमास्तामिमरामपदमनिशममलं ॥ ६ ॥ अजानन्नप्यहंकाव्यंक
र्तुंजातःसमुद्यतः ॥ प्रभुभक्त्याबलादेवविहितोस्मिसमुद्यतः ॥ ७ ॥ काव्यंनवरसहीनंयदपितदपिसद्रसायनंभाति ॥ यस्मात्प्रवर्ण्यते
स्मिन्पुराणसंज्ञोक्षयोरसःश्रौतः ॥ ८ ॥ उपक्रवोपिश्रीगेंद्व्याःस्तुवतोस्मियामतः ॥ रामस्यवर्णनादत्रभवनद्यांसुपारदः ॥ ९ ॥ व्या
सेनवल्मीकभवेनयस्यसंवर्णितंसच्चरितंसुपूतं ॥ नैवापुसीमानमिदंत्रित्यसक्षिप्तमेवक्रियतेमयैतत् ॥ १० ॥ श्रीमानयोध्याधिपतिः
सवीरोधीरोदशस्यंदननामकोभूत् ॥ यस्माद्विराजोद्विजवर्गतोभवत्तृणाशोपिचजिह्मगानां ॥ ११ ॥ सधन्वीप्रजापालनंसंवितन्व
न्प्रजांनापतापाभिभूतोबभूव ॥ वसिष्टाज्ञयापुत्रकामेष्टितुष्टान्सुदविष्टानपरिष्टान्प्रचक्रेपिशिष्टान् ॥ १२ ॥ सखासुरेशस्यसुखाययज्ञे
वसिष्ठशिष्योपितमृष्यशृंगं ॥ समार्चयन्नैजविधिप्रयोगान्मुनिःप्रजातश्चतदासुतुष्टः ॥ १३ ॥ अर्पितेनहविषासुसर्पिषातार्पितोपिसउषर्बुधः
पुमान् ॥ प्रादुराससदुरासदोसतांधर्भिणामथचशर्मकृद्विभुः ॥ १४ ॥ उवाचवन्हिर्विशदंविवस्वत्कुलप्रवीरंवचनंत्वमेतत् ॥ गृहाणदिव्यं
नृपपायसंमेपात्रस्थितंपुत्रहितंपवित्रं ॥ १५ ॥ सुतोनमेस्तीतिसुतापयुक्तःप्रतापशालीनरपालमौलिः ॥ सपात्रकात्पायसपात्रमादाद्दौ
वधूभ्यांत्वविभज्यताभ्यां ॥ १६ ॥ कौसल्याकैकय्यौनृपभार्येतेउभेतदाप्रीत्यै ॥ सरलेनिजभागार्धंददतुःसत्रेसुमित्रायै ॥ १७ ॥ कौस

(3)



ल्याकैकय्यौनिजभागार्धंतदासमार्प्यतां ॥ सापिसुमित्रार्धौतावपिसर्वास्तामहाभागाः ॥ १८ ॥ गर्भचिन्हंदधुस्तिस्रोराज्योराज्ञोतिव
ल्लभाः ॥ ननंदसप्रजानाथःप्रजाप्राप्तिर्भवेदिति ॥ १९ ॥ प्राप्तेप्रथमासेदशमेनृपस्यजायात्वमन्वर्थमुपागतास्ताः ॥ यतःश्रुतीनामपिय
त्सुतत्वंतासांचतुर्धाव्यगमत्सुतत्वं ॥ २० ॥ दशरथनृपजायाकोसलेंद्रात्मजायानिखिलसुरवरेण्यंराममीड्यंशरण्यं ॥ भरतमथसु
मध्यामध्यमासापिमेध्यासुषुवइतरराज्ञीलक्ष्मणारिघ्नसंज्ञौ ॥ २१ ॥ बहुजनवितरणकारीबभौदशस्यंदनःससानंदः ॥ भवजलधितार
कोयत्पोतोभुवनेत्रभूवयस्यैव ॥ २२ ॥ पुत्रीगौणात्मेतितुदशरथतनुजंविनैववाक्यमिदं ॥ श्रुतिभिर्विमृग्यमाणःपरमात्मायस्सएवत
द्रूपः ॥ २३ ॥ भवजलधितर्तुकामैःसेव्योहंयत्नतःसदाविबुधैः ॥ इतितरणिसंततिप्रभुरव्याच्छ्रीरामएवास्मान् ॥ २४ ॥ तेनकालेनतेसर्वे
खर्वेतरगुणाकराः ॥ संस्कृताःपाठिताजातास्तनयाविनयान्विताः ॥ २५ ॥ चत्वारःपुरुषार्थाआम्नायावाचतुःसमुद्रावा ॥ मूर्तिधरानृपभा
ग्यादित्युच्चैस्तेजनाअवदन् ॥ २६ ॥ रामंरामगुणंप्रकामविनयंसल्लक्षणंलक्ष्मणंनित्यानित्यरतंतथैवभरतंपुत्रंचशत्रुघ्नकं ॥ भूपोभूरिबभूव
मोदभरितोमातापिहर्षान्वितासासेर्ष्यारहिताहितेनसहितानुसंवीक्ष्यसर्वानमून् ॥ २७ ॥ कुशिकात्मजेननृपतिःसयाचितोमखरक्षणायतव
राममाशुमे ॥ दिशतन्निशम्यवचनंददौतदानिजधर्मरक्षणपरःसलक्ष्मणं ॥ २८ ॥ गच्छन्पथेमुनींद्रोनिस्तंद्राभ्यांसराघवेंद्राभ्यां ॥ विद्ये
तेअनवद्येक्षुत्तृड्बाधाहरेमुदाप्रादात् ॥ २९ ॥ देहित्वमेतत्बहुदुःखदायिरसस्पृहाहेतुतयाप्रसिद्धं ॥ गुरूपदेशाद्यदिचेत्सुविद्याप्राप्तिस्तदैवाशु
विनिर्गतंस्यात् ॥ ३० ॥ मुनेःक्षुत्तृड्व्यथानाशकारिविद्यापरिग्रहात् ॥ गुरुमाहात्म्यमेतादृगितिस्पष्टंतदाकरोत् ॥ ३१ ॥ विजनेसवने
रामस्तयाताडकयाकृते ॥ प्राप्तएनंमुनिःप्राहजहिकाननुनाशिनीं ॥ ३२ ॥ ताडकामभिजघानराघवःकौशिकीयवचसैवबाणतः ॥ तद्गु
रोर्वचनमेववेदवन्माननीयमितिसंव्यबोधयत् ॥ ३३ ॥ तुष्टोमुनिस्तदादाद्दिव्यान्यस्त्राणिराघवेंद्राय ॥ प्रीत्यागृण्हात्प्रभुरपिसतदालोकानु

(3A)

करणशीलःसन् ॥ ३४ ॥ एकोविष्णुस्तामसोराजसोत्रासत्त्वाढ्यःसन्भातिभक्तैकवश्यः ॥ लोकानेवंबोधयन्नेवरामस्त्रित्वंप्राप्तस्तन्मुने
र्निघ्नताभाक् ॥ ३५ ॥ सानुजेनसरामेणप्राप्तःसिद्धाश्रमंप्रति ॥ अभूत्समुत्सुकोयज्ञविघ्ननाशोभवेदिति ॥३६॥ विश्वामित्रस्तत्रसत्रंसुरेशे
जातेत्रातर्यारभन्मारांजित्सन् ॥ दीक्षाकालेराक्षसौक्षोभयंतौवैकुंठेनप्रापितौकुंठतांतौ ॥ ३७ ॥ तुल्येपराधेऽपिसुबाहुमेवनिनायबाणेनप
रंसलोकं ॥ मारीचमबंधितदिहेतिमन्येदैवंप्रधानंसुखदुःखदाने ॥ ३८ ॥ सविधिःपूर्णतामापचित्रमत्रास्तिकिंबुधाः ॥ त्रैलोक्यपालकोय
स्यविधेर्हिजनकोऽविता ॥ ३९ ॥ ततःशेषास्तुशेषेणसरोषेणसपत्रिभिः ॥ हताःसंतोह्यसंतोपिस्वसंतोषाद्दिवंययुः ॥ ४० ॥ आमंत्रितो
यन्मिथिलाधिपेनगच्छन्सयज्ञार्थममुंमुनींद्रः ॥ रामंतदोवाचतमेवभूपंसंवर्णयन्किंचिदिदंमहात्मा ॥ ४१ ॥ शशिभास्करान्वयभुवःप्रज
ज्ञिरेकतिवानृपाइहयथासमैथिलः ॥ नतथाभविष्यतिवभूवभूपतिर्विलसत्कन्यकासमभवाद्धितत्सुता ॥ ४२ ॥ यस्यपरंपरयाप्तांश्लाघ्यांनि
गमस्थितिंसमावीक्ष्य ॥ अपिपौरजनामुनयोरागमरागंचसंस्तुवंत्येव ॥ ४३ ॥ तत्रुरुद्रधनुःक्षुद्रगर्वंखर्वीकरोतियत् ॥ आगमिष्यसिचे
द्रामभद्रद्रक्ष्यसितत्किल ॥ ४४ ॥ श्रुत्वेत्युक्तंऽितौजातौनीतौतेनपथिद्रुतं ॥ भार्यायागौतमस्यर्षेःकाननंतेसमागमन् ॥ ४५ ॥ निर्जनंत
द्वनंदृष्ट्वाप्रांजलीराघवस्तदा ॥ अपृच्छत्तंमुनेकस्मादृहनंपुनरुत्तमत ॥ ४६ ॥ सौरभानुप्रवृत्तिस्तुसदामोदप्रदायिनी ॥ सापिसंतापदैवेह
काननेविजनेमुने ॥ ४७ ॥ इतिपृष्टःसमौत्सुक्याद्वनवृत्तंपुराभवं ॥ अहल्योद्धृतिकामोसौमुनिराहेतिराघवं ॥ ४८ ॥ इंद्रोगौतमदार
धर्षणमनास्तद्वेषवतस्तद्गृहंप्रागात्स्नातुमुपागतेमुनिवरेतामुक्तवांस्तत्स्वरः ॥ धर्मोमेपरिपूर्णतांबहुमखैःप्राप्तोपिसार्थोस्म्यहंकामंमेपरिपूरय
त्वमधुनाऽनंगीयसौख्यंत्विदं ॥ ४९ ॥ अहोकामोतिवामोयंयन्मनोभूरपिस्वयं ॥ सुमनःप्रवरस्यापिमनश्चक्रेतिविव्हलं ॥ ५० ॥ वांछा
मिभोक्तुंरमणीहकालेनरोचतेमेरसहीनताते ॥ फलानिरुच्यानिसुपाकसिद्धिर्बुभुक्षितःसंप्रतिनास्मिकांते ॥ ५१ ॥ सदागममाचारपथप्र

वृत्तः किमागमोक्तादिवसेरतिर्या ॥ मदागमेत्रैवमयासमुक्तामताजनेमेविबुधेंद्रतास्ति ॥ ५२ ॥ विधिकन्यामुनिपत्न्यपिवचनंतस्याति
मोहकंश्रुत्वा ॥ रमणंस्वमेवमत्वारमणंचक्रेचशक्रेण ॥ ५३॥ दिव्यगंधानुपाघ्रायतदीयांगस्यसातदा ॥ कलंकोस्यभवेत्संगान्नमद्भर्तेत्यत
र्कयत् ॥ ५४ ॥ असन्मार्गेक्षिपादस्यसर्वथानप्रवर्त्तनं ॥ कोसित्वंतमिदंभंक्तुंगूढोदेवोत्रसंगतः ॥ ५५ ॥ अहंदेवराजोस्मिपुण्यैकलभ्यस्त
वासेचनेनैवरूपेणवश्यः ॥ ततस्तस्यरूपंविलोक्याशुमूढाभुजंगप्रयातानुयाताचसाभूत् ॥ ५६ ॥ समुनिर्गृहमागत्यदृष्ट्वान्यायंरुपान्वि
तः ॥ भार्यांचक्रेदृषद्रूपांतंसहस्रभगंतदा ॥ ५७ ॥ संसारगुरुसुखंस्यात्तुबहुधान्यक्षेत्रसंयोगात् ॥ इतिगोपोत्रब्रह्मभुवंअकर्षयत्साल्वहल्या
हो ॥ ५८ ॥ अहोभाग्यवतांभाग्यंकेनापिननिवार्यते ॥ सहस्रभगत्वंविच्छापादापसुराधिपः ॥ ५९ ॥ यज्ञेबहुलाज्याप्त्यामदवान्म
हारधर्षणंचक्रे ॥ इतिरोषादिवबुद्धःसगौतमोयज्ञखंडनंचक्रे ॥ ६० ॥ सत्रांधोयंपुनर्माभूदितिस्निग्धेनचेतसा ॥ सहस्राक्षंचकारेंद्रंस्वभा
वात्सुमृदुर्हसन् ॥ ६१ ॥ प्रणतायाःस्वभार्यायामुक्तीरामादितिब्रुवन् ॥ विनीतस्यसुरेशस्यसहस्राक्षत्वमुक्तवान् ॥ ६२ ॥ अस्याना
न्यागतीरामत्वत्पादाब्जंविनायतः ॥ ततएनांसमुद्धृत्यकुरुकीर्तिंमनोहरां ॥ ६३ ॥ इत्याकर्ण्यपुरावृत्तंतूष्णीमेवसराघवः ॥ स्वपादा
ब्जरजोयोगादहल्योद्धृतिमाचरत् ॥ ६४ ॥ हरेःसरजसःसंगाच्छिलाभूद्वामभोमयी ॥ बालैवरजसान्यस्यपदयोःसुखयोगिनी ॥ ६५ ॥
ईंद्रेणसंगतायाहल्यापाषाणरूपतामाप ॥ सोपेंद्रेणस्वचरणरजसाचैतन्यमापितामुमुदे ॥ ६६ ॥ कौशिकेनकिलधार्षितासतीयाबभूव
भुविदूषितासती ॥ कौशिकीयवचसाप्रबोधितोभूषितामपिचकारतांप्रभुः ॥ ६७ ॥ विभिजातोदयंकर्त्तुंप्रवृत्तस्यहरेस्तदा ॥ पादरेणुस्तमे
वासौचक्रेविध्यनुरोधतः ॥ ६८ ॥ करयहोमेपरपूरुषस्यनयुक्तएवेहपरस्त्रियाःस्यात् ॥ अपावयत्तांरजसापदस्यनपुंसकेनेतिविचिंत्य
रामः ॥ ६९ ॥ आदौविधेःसुताभूत्पश्चाद्धरिपादधूलितोजाता ॥ स्त्रीत्वेसतिद्विजत्वंप्रापाहल्यैवलोकेस्मिन् ॥ ७० ॥ जननीरागोस्याइति

(5A)

हेतोस्तत्कानेनेनकोपिजनः ॥ अजनस्यपादधूलिर्जननीजातास्वभर्तृसेवेच्छोः ॥ ७१ ॥ सद्योमुक्तिर्नास्याउचितानिजभर्तृभजनरक्ता
याः ॥ प्राजीजनदितिहिंतोःस्वपादरजसातदाहल्यां ॥ ७२ ॥ पंचसुसतीष्वहल्याकनिष्ठिकाधिष्ठिताकृताकविभिः ॥ श्रीरामचरणधूलेर्म
हिमात्रान्यन्नकारणंकिमपि ॥ ७३ ॥ विदेहनगरींमुनिर्दशरथात्मजाभ्यांयुतोययौद्रुतगतिर्नृपःसतुसमर्प्यपाद्यादिकं ॥ अपृच्छदपितंत
दामुनिवरंशिशूकाविमौदिवाकरनिशाकरौकिमुतशंभुनारायणौ ॥ ७४ ॥ निशम्यावदत्कौशिकस्तंविदेहमयंरामनामाश्रितामन्मखस्य ॥
असौलक्ष्मणोवीरवर्योनुजोस्यद्युतौसद्गुणाढ्यौदशस्यंदनस्य ॥ ७५ ॥ सानुजंदशरथस्यतनूजंसोर्चयन्नृपवरोतिननंद ॥ प्रत्युवाचमुनि
राडथतंस्वंदर्शयाशुमिहशैवशरासं ॥ ७६ ॥ उवाचनिमिवंशेनोमुनिरामोतिकोमलः ॥ धनुरारोपणेदक्षःकथंशिशुरसौभवेत् ॥ ७७ ॥
अस्मान्नप्रवरोलोकइतिविश्ववरोवदत् ॥ तदातदानयामासदर्शयामासराघवं ॥ ७८ ॥ सौधाग्रसंस्थाहसखींप्रियांसाविदेहकन्यासुनिरीक्ष्य
रामं ॥ सर्वेनृपाअप्यवरामतामेवरःपुमान्राघवएकएव ॥ ७९ ॥ इमेन्यपृथ्वीपतयःसखिस्युस्तातेनतुल्याअपिसद्गुणाढ्याः ॥ गोत्रा
त्मजायाममवल्लभोस्तिगंभीरकःसागरएवकश्चित् ॥ ८० ॥ महर्षिवाक्यात्सतुसर्वयुक्तोगुणेनसंयोज्यतदाचकर्ष ॥ अवापचापप्रवरोवि
भंगंसंगेनहस्तस्यवरस्यपुंसः ॥ ८१ ॥ गुणकोटियुतोपिपावनेयउग्रकर्मणिसहायइहभवति ॥ भंगंतस्यतनोभीत्यबोधयच्चापभंगेन
॥ ८२ ॥ चंडीशकोदंडमखंडयद्यच्छस्तेनहस्तेनरघुप्रवीरः ॥ तत्सत्वसत्वायसतत्वरूपोमन्येतनोत्तामसधर्मनाशं ॥ ८३ ॥
तच्चापजन्मातुरवस्तदानींकैलासवासस्यशिवस्यशीर्षं ॥ सुसंभ्रमात्पूर्वमकंपयच्चप्रशंसयासोपिरघूद्वहस्य ॥ ८४ ॥ निर्जरवरस्य
पुंसःपुराणसंज्ञातदैवसार्थाभूत् ॥ धनुषोरवेणदेहेदत्तःकंपोयदातस्य ॥ ८५ ॥ भूयाद्गुणानुबंधोऽनेनजनुषिजनुषिममसदैवेति ॥
स्वर्णमयींतांमालांरामगलेप्राक्षिपत्तदासीता ॥ ८६ ॥ सीतायाःपरिणयनेकृतनिश्चयकेनतेनजनकेन ॥ दूताहूतःसैन्यैर्गुरुं

(5)



पुरस्कृत्यरामततोगात् ॥ ८७ ॥ श्रुत्वागतंपंक्तिरथंविदेहःप्रत्युज्जगामातिसमुत्सुकःसन् ॥ पुरोधसास्वेनयुतोयथोक्तं
क्रमेणसंपूज्यनृपंमुमोद ॥ ८८ ॥ महर्षिमादौपितरंचमातृःप्रहर्षतोसौप्रणनामरामः ॥ सुलक्ष्मयुक्तोपिचलक्ष्मणस्तान्सर्वैपितेपर्व
महत्प्रपन्नाः ॥ ८९ ॥ सुशोभनेसौस्तदनेनृपेणसंस्थापितःपंक्तिरथोनृपेंद्रः ॥ आकारितस्तेननिजानुजोपिसांकाश्यपुर्याःसकुश
ध्वजाख्यः ॥ ९० ॥ विवाहाख्यमसौकर्मकर्तुंधर्मविदग्रणीः ॥ समारंभनसंभारान्समारातिसपक्षकः ॥९१॥ अविवाहमुखायास्मिन्देवाः
संतोषिताःसभासस्व ॥ यत्रविवाहःपरमःसतुतदभिख्यःसमुत्सवोजातः ॥ ९२ ॥ पुराहंविर्भिर्वरदाक्षिणाभिःस्वर्भूसुरास्तोषमिताः
सर्वेये ॥ देवप्रतिष्ठासाहितेविवाहाभिधोत्सवेतेमुदिताअतीव ॥ ९३ ॥ शुभेमुहूर्तेसुदिनेसुलग्नेसाकंनिजैर्बंधुभिराव्हयत्सः ॥ न्यवेशय
त्स्वर्णमयेसुपीठेरत्नांचितेराघवमंबुजाक्षं ॥ ९४ ॥ प्रक्षाल्यपादौजनकराज्ञामूर्ध्नीधृतंयत्सलिलंशिवेन ॥ संवंदितौतौकरयोर्गृहीत्वा
समर्पितासावनिजावराय ॥ ९५ ॥ औरसीमूर्मिलांकन्यामन्यांतांलक्ष्मणायच ॥ सुधीरायसुधीराजातदादात्समुदान्वितः ॥ ९६ ॥
मांडवींश्रुतकीर्तिंचकन्यकेशुभलक्षणे ॥ भरतायारिपुघ्नायकुशकेतुर्ददौक्रमात् ॥ ९७॥ एकश्चतुर्धासरभेश्वरोभूद्विदेहजाताकमलापितद्वत् ॥
तैरेवसाकंकरपीडनंतत्ताभिःकृतंशीलगुणानुरूपैः ॥ ९८ ॥ चतुरोदारसंपन्नांश्चतुरोवीक्ष्यतान्सुखे ॥ मज्जन्मनानृपोमेनेफलंमज्जन्मन
स्त्विदं ॥ ९९ ॥ ततोविधिज्ञैर्विप्रैस्तैःसांगेसंपादितेविधौ ॥ सदारदारकैर्हर्षात्प्रतस्थेसउदारराट् ॥ १००॥ यःकार्तवीर्यांतकरोधनुष्मान्कु
ठारपाणिःपथिनीलकांतिः ॥ सभार्गवःक्षत्रियगर्वसर्वंकषोभ्यगात्कार्मुकभंगरोषात् ॥ १ ॥ समागतंमृत्युमिवापरंतंदृष्ट्वाभयात्त्रस्तमनाः
प्रणामं ॥ कृत्वाद्रुतंपंक्तिरथोभ्युवाचसंरक्षबालंममभोःक्षमस्व ॥ २ ॥ भृगूद्वहोसौनृपतेरशृण्वन्वाचंतदोवाचरघूद्वहंतं ॥ मय्यागतेनिष्ठुर
केगरिष्ठेलघिष्ठातिष्ठेत्क्वनुशौर्यमेतत् ॥ ३ ॥ त्वयैवभग्नंकिमुकार्मुकंमेगुरोरविज्ञातबलेनबाल ॥ वदाद्यवातिष्ठमदग्रतस्त्वंमदोस्तितेचेद्विम



Joint project of the Rajawade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

दोपिभूयाः ॥४॥ एकविंशतिधाक्षत्रगर्वपर्वतभंजने ॥ पाकशासनभूतंमांपाककिंवेत्सिनैवरे ॥५॥ वदामिबह्वधामूढनोत्तरंकिंददासिमे ॥
श्रुत्वाहसभवद्दर्णगुरुतांवीक्ष्यवच्मिन ॥ ६ ॥ ब्राह्मण्यमेवजल्पन्शौर्यंकिंलोपयसिविमूढमम ॥ श्रुत्वात्रवदत्सराम ःस्वजातिधर्मोमुने
वरःप्रोक्तः ॥ ७ ॥ मुखजेत्वयिमुख्यत्वंबाहुजत्वंमयिस्फुटं ॥ अतोत्रभवतासार्द्धंनयोद्धव्यंकदाचन ॥ ८ ॥ भग्नंपुराणंभवकार्मुकंयत्तेनै
वमानंवहसीहकिंत्वं ॥ नारायणीयेखुदृढेशरासेगुणंसमारोपयचेद्बलिष्ठः ॥९॥ आदायतस्यहस्ताद्धनुस्तुशक्त्याचकारतंकुंडं ॥ परलोकगतिं
सज्जंकृत्वासमकुंडयच्छरतः ॥ १० ॥ अगच्छन्नपिनाकंसनिग्रहाज्जानकीपतेः ॥ अनुग्रहप्रभावेणमहेंद्रस्थानमभ्यगात् ॥ ११ ॥ संवी
क्ष्यरामंजयिनंसरामादालिंग्यहर्षादपिचोत्तमांगे ॥ आघ्रायतैर्मंगलतूर्यघोषैःपुरीमयोध्यामगमन्नृपेंद्रः ॥ १२ ॥ तदारामासक्तांविनयगुण
युक्तांदशरथःप्रजांपुत्राभिख्यामथचजनरूपांसुचतुरः ॥ समावीक्ष्यैवालीन्सुमनसिपरामोदभरितोमयालब्धंमेनेजनिफलमिदंविश्ववितु
तं ॥१३॥ रामलीलालताकांडःसंपूर्णस्त्वमिहागतः ॥ भूयात्सुमनसांयोगादामोदफलदोजने ॥१४॥ गोदावरीतीरविराजमानेक्षेत्रेवसन्ना
सिकसंज्ञकेयः ॥ देवोपनामाहरिभक्तिलब्ध्यैगंगाधरःकाव्यमिदंचकार ॥ ११५ ॥ इतिश्रीरामलीलालतायांबालकांडःप्रथमः ॥ १ ॥

(6)

|| श्रीगणेशायनमः || अथपंक्तिरथोराजाप्राप्तसर्वमनोरथः || भुजेभारंलघूकर्त्तुमुर्व्याऐच्छज्जरायुतः || १ || तद्यौवराज्यंस्वसुतायदातुं
समुत्सुकोसौनृपतिर्यदासीत् || वाण्यांतदाधात्कुटिलत्वमेवंसामंथराकेकयकन्यकायाः || २ || रुष्टाहंदेहिराजेंद्रदुष्टाकेकयनंदिनी ||
वनावनंगरिष्टायकनिष्टायजनावनं || ३ || तस्यावाचमतिक्रूरांनिशम्योवाचभूपतिः || गुणारामेणरामेणकिंतेवादुष्कृतंकृतं || ४ ||
दुष्टास्पष्टतरंप्राहसत्यभ्रष्टोभवान्भवेत् || तर्हितेनिरयोदूरंनतिष्ठदपिकर्हिचित् || ५ || अभिवादनशीलंतंसुतंवीक्ष्यसभूपतिः ||
कैकय्योक्तमभिव्यक्तंकर्तुंवक्तुंप्रचक्रमे || ६ || नाटव्यध्वंकदापित्वमटव्यध्वानमाश्रय || मातात्वदतितेवत्समातावद
तिलंघय || ७ || अबलानाममात्रेणसबलेयंवरद्वयात् || वनंददातियत्तुभ्यंभरतायप्रजावनं || ८ || ततोबलासानुवराद्वरौ
द्वौलब्ध्वापिजातापुनरुक्तभूता || प्रव्हस्त्वतोयत्प्रवरत्वमार्सीद्रामस्यदावेपिसहायभूतं || ९ || पितुराज्ञांपुरस्कृत्यसतुराज्ञांसुदुस्त्यजं ||
प्राज्यंराज्यंपरित्यज्यकाननंस्वाननंययौ || १० || चतुरतासमादावंचतुराशास्थितोययौ || वसतीशमुखोरामोवसतिंनाव
कांक्षतां || ११ || रामविनयगुणमेवंकेकयकन्याप्रकाशयासाव || तच्छीलपरीक्षायैदुष्टजनस्तादृशोनसाधुजनः || १२ ||
अन्वगच्छत्ससौमित्रिस्तमुवाचरघूद्वहः || पितृभक्तिरितोभ्रातर्भवत्वंभवनेसुखात् || १३ || सौमित्रिरवदद्रामंकामंसंतुविपत्तयः ||
विभोपदांबुजासक्तोभक्तोहंतुतवानुगः || १४ || तवपदभजनेसतिप्रभोसकलास्ताविपदोपिसंतुमे || दिनकरकरमंडितेंबरेकिमुताराः
प्रतिभांतिराघव || १५ || नभोगएशेचरणाब्जयुग्मेसन्मानसस्छेऽतिरतिःशुचिश्च || यःसर्वदारामगतिंवितन्वन्सलक्ष्मणःसाधुगतिर्नु
हंसः || १६ || ततोजनकजागेहंगतोरामःसलक्ष्मणः || दृष्ट्वातंसार्चयद्देवीसंभ्रमादुत्थितासती || १७ || कुरुश्वशुरसेवनं
जनकनंदिनित्वंगृहेचतुर्दशसमावनेष्वहमटन्समेष्यामिवै || प्रभूदितमिदंतदाक्षितिसुतासमाकर्ण्यसाऽब्रवीद्विरहजव्यथांतवविभोसहे

हंकथं ॥ १८ ॥ रजन्यभिख्यययारामचंद्रनैवमयाविना ॥ आकृतिःशोभनातेस्यादमाहंत्वामृतेविभो ॥ १९ ॥ ब्रह्मचर्येपिते
याहंकृष्णाजिनमुपागता ॥ सासहिष्येकथंनाथवियोगमसहंतव ॥ २० ॥ पूताभूभृत्सुतासीतावाहिन्येवमतायतः ॥ आनंदनीरधिं
रामंनताजातानुसंगता ॥ २१ ॥ गत्वाथमातृभवनंनत्वाचरणौचवृत्तमावेद्य ॥ पत्न्यनुजाभ्यांसाकंगमनानुज्ञामयाचतसुधीरः
॥ २२ ॥ दोषंदत्तवतीदैवेकौसल्योक्तवतीतदा ॥ मातातेजगतांभूयादवितासविताचयः ॥ २३ ॥ सुमंत्रेणसमानीतेतस्तूरथवरे
त्रयः ॥ जग्मुस्तेनैवतेयत्रसनिषादःसखागुहः ॥ २४ ॥ उषित्वारजनीमेकामेकांतेयोमुनीश्वरैः ॥ ध्यातोयातोपिगंगायाःपरं
तीरंसनौकया ॥ २५ ॥ अहमिहगुहस्यभाग्यंवंदेवाचामगोचरंसततं ॥ भवजलधितारकःसुरसरितिसनावैवतारितोयेन ॥ २६ ॥
पद्भ्यामेवततोययौलघुभरद्वाजाश्रमंराघवोजानक्यासहलक्ष्मणेनचतदाहर्षंजगामाद्भुतं ॥ यत्रान्योन्यविरोधिनोपिचमृगाःसंत्यक्तवैरा
नगाःसंफुल्लाःफलिनःखगाअपिसदामंजुस्वरोद्घोषिणः ॥ २७ ॥ भरद्वाजोद्विजःसोपिबहुशाखागतिर्वने ॥ दैवागमप्रभावेणख्यातो
विप्रवरोभवत् ॥ २८ ॥ आनंदयित्वाथमुनिंनृपेंद्रस्तंचित्रकूटाद्रिमुपाजगाम ॥ तत्रोटजेलक्ष्मणनिर्मितेसोवसद्विदेहात्मजयाप्रसन्नः
॥ २९ ॥ आर्तोवार्तांसुमंत्रात्तांश्रुत्वाभूपोतिमूर्छितः ॥ रामरामेतिजल्पन्सन्ननल्पांगतिमाययौ ॥ ३० ॥ समातुलपुरानीतोविनीतोभरत
स्तदा ॥ श्रुत्वातांसंस्थितिंराज्ञःप्राज्ञःप्रापद्विहस्ततां ॥ ३१ ॥ भ्रातरंसस्मरन्रामंविनिंदन्मातरंनिजां ॥ कृत्वापितृक्रियांज्येष्ठंद्रष्टुंस्त्विष्टं
द्रुतंययौ ॥ ३२ ॥ गुहंभरद्वाजमुनिंचदृष्ट्वापृष्ट्वारघूणांप्रवरस्तदासौ ॥ ददर्शसेनासहितोनगंतंगंतव्यमारादतिविव्हलोभूत् ॥ ३३ ॥
आलोकयद्रामममुंगिरींद्रेसीतायुतंलक्ष्मणसेवितंच ॥ ननामभक्त्यापिसदीर्घदोर्भ्यामालिंगयंस्तंभरतंननंद ॥ ३४ ॥ नत्वागुरुंमातृजनं
चवृद्धान्पप्रच्छसाध्वींस्वपितुःप्रवृत्तिं ॥ आकर्ण्यहाहेतिवदन्रुदन्सलोकानुकारीनिपपातभूम्यां ॥ ३५ ॥ मंदाकिन्यामथस्न।



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(७ब)

त्वातर्पयित्वाजलेनच ॥ मुन्यन्नेनैवपिंडान्सपितृभ्योदत्तवान्भुवि ॥ ३६ ॥ प्रणम्यभरतोवदद्रघुवरंप्रभोसंप्रतिवनंसमुचितंकथंनरवर
स्यतेयौवने ॥ प्रयाहिनगरंजनावनरतोभवेशाधुनामयाहिनगरंजनंतवविषह्यमेतात्किमु ॥ ३७ ॥ पितुराज्ञयातवाभूद्राज्यमरण्ये
चतुर्दशसमामे ॥ गतिरितिवत्सततस्त्वंपुरंद्रुतंयाहिसोत्रवदिथतं ॥ ३८ ॥ रघुपदेहिपदाब्जनिषेवणंतवसदैवनराज्यमदो
स्तुमे ॥ नृवरतामधिगम्यपदांबुजाद्विरहितःक्वलभेयपरंसुखं ॥ ३९ ॥ भुवितवपदसेवनंविहायप्रभुवरराज्यमिदंसुखायकिंवा ॥
करगतममृतंविमुच्यकोत्रागतरसमिच्छतिदूरादिकदन्नं ॥ ४० ॥ अनृतादहमस्मिकातरोभरतत्वंकिलमद्वियोगतः ॥ धृति
मामुहिवत्ससांप्रतंपुनरेष्याम्यवधिंप्रपालय ॥ ४१ ॥ त्वयैवसाकंविपिनंव्रपेंद्रयास्यामिनेच्छामिचकिंचिदन्यत् ॥ इदंहिहा
स्यामिकलेवरंवाकथंसहिष्येविरहंसुदुःखं ॥ ४२ ॥ रहस्यंनिजंज्ञापयिष्यन्सरामोवसिष्ठायनेत्रांतसंज्ञांचकार ॥ तदैकां
तदेशंप्रणीतोपिहार्दादुवाचेतितंसाश्रुनेत्रोतिदीनः ॥ ४३ ॥ वारितोयंमयारामोयातिमेजविनंवनं ॥ मनश्चेतःसुसंत
प्तंस्वांतमिच्छतिहेगुरो ॥ ४४ ॥ विद्वद्वरिष्ठोभगवानवसिष्ठश्चकारतस्मिन्निजशक्तिपातं ॥ उवाचतंराघवएषविष्णुःस्वली
लयामानुषवेषधारी ॥ ४५ ॥ सदापत्रत्वभागेषपलाशदलनक्षमः ॥ छन्नच्छायःसतांचित्तेनित्यानंदागमोत्रविभुः ॥ ४६ ॥ ज्ञात्वाचिदा
नंदमयस्वरूपंरामंस्वभक्तानवितुंप्रवृत्तं ॥ सविस्मयोत्फुल्लविलोचनःसन्नागत्यभक्त्याप्रणनामतंच ॥ ४७ ॥ ज्ञानंमदाप्रचापितथान
भूयाद्यथागुरोर्वाक्यतएवसम्यक् ॥ इतीवबोद्धुंभरतंतदानींचकारतस्मादुपदेशयुक्तं ॥ ४८ ॥ ज्ञानेसत्यपिसगुणप्रेमोत्कर्षोविभाति
भक्तेषु ॥ इत्यवधिकालरामादर्शनशंकामतिज्ञासीत् ॥ ४९ ॥ यद्यागमविलंबस्तेधक्ष्यामीदंनिजंवपुः ॥ सहिष्येहंकथंनाथवियो
गमसहंतव ॥ ५० ॥ आश्वास्यबह्ववचोभिःप्रादान्मणिपादुकेविभुस्तस्मै ॥ तेपरिगृह्यसभरतोनंदिग्रामंजगामचीरधरः ॥ ५१ ॥

the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सिंहासनेसौप्रभुपादुकेतेविन्यस्यनान्याहितमानसः सन् ॥ राजोंपचारैरखिलैस्तदार्चाचक्रेस्वयंभोगविवर्जितोभूत् ॥ ५२ ॥ साक्षात्कृते
रत्तरतोवियोगात्प्रेमप्रवृद्धंनतथान्यथास्यात् ॥ श्रीरामभद्रोभरतायतस्मैप्रादादमुंभक्तवरायतस्मात् ॥ ५३ ॥ पादुकाद्वयमभूत्त्रि
गुणंयत्रामपादरजसाभृशमीड्यं॥सत्ववृत्तिपरिपोषणकारिपातकंहरतिचिंतनभाजां॥५४॥अह्रैतरामस्यपदारविंदसंलग्नपादूद्वयचिंतनेन॥
तापत्रयंप्राप्तलयंजनस्यभवेच्चतुवर्गफलप्रसिद्धिः ॥ ५५ ॥ सुप्तेपत्याचंकेशिरोनिधायैकदागिरौकाकः ॥ अभ्येत्यददारांगंतथापिनचचा
लसाचलापुत्री ॥ ५६ ॥ द्रुहिणधिषणमुखकविभिर्यस्यामहिमानानिगदितुंशक्यः॥ द्विजचांडालस्तस्याअंगेच्छिद्रंतदाव्यतनोत् ॥५७॥
सर्वज्ञोपियदीयंदोषंनज्ञातवान्सचंडीशः ॥ सापिच्छिद्रंसीताद्विजकुलहीनात्सघोषतःप्राप ॥ ५८ ॥ यस्मात्काकः समभ्येत्यजानकयं
गंददारतत् ॥ पूर्वंविहीनतांप्राप्तः पश्चात्सच्छिद्रकृज्जनः ॥५९ ॥ सुप्तोत्थितःप्रभुःसतुसीतांगच्छिद्रकारिणंदृष्ट्वा ॥ तृणमप्यस्त्रीभूतंचक्रे
काकस्तदाभीतः ॥ ६० ॥ प्रभुणायदिप्रयुक्तंतृणमप्यस्त्रायतेजनेदुष्टे ॥ सीतांगभेदकारिणिकाकेरामेणदर्शितंत्वेतत् ॥ ६१ ॥ शरणागता
पराधस्मरणविहीनोपिराघवोस्त्रंन ॥ प्रणमतिकाकेचक्रेतदक्षिभंगेनसफलितंसद्यः ॥ ६२ ॥ अत्रेरथाश्रमंगत्वानत्वातस्यपदांबुजं ॥
प्रभुःप्रापाशिषस्तस्मादस्माल्लोकानुकारकृत् ॥ ६३ ॥ भाविनिविरहेसत्यपिभवितात्वगाघवेणसंयोगः ॥ इत्यंगरक्षणार्थंकिमंगरागंद
दौतस्यै ॥ ६४ ॥ धात्रीपुत्र्यैनमस्यंत्यैकुंडलेद्वेअदात्तदा ॥ दुकूलेनिर्मलेसानसूयाभाक्तियुतासती ॥ ६५ ॥ रक्षःशिक्षासुदक्षःसभक्त
रक्षणदीक्षितः ॥ चंडकोदंडभृत्प्रापदंडकंविपिनंततः ॥ ६६ ॥ रामलीलालताकांडःसंपूर्णत्वमिहागतः ॥ भूयात्सुमनसांयोगादामोद
फलदोजने ॥ ६७ ॥ इतिश्रीरामलीलालतायांगंगाधरकृतौअयोध्याकांडःसंपूर्णः ॥ शुभंभवतु ॥ श्रीरामचंद्रार्पं० ॥ ७ ॥ ॥ ७ ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao ... Pratishthan, Mumbai

(8A)

॥ श्रीगणेशायनमः ॥ रामोदंडकविपिनंयदाभ्यगाल्लक्ष्मणेनजानक्या ॥ त्रिरसंदिदृक्षुयमिनोमनोरथःपूर्णतांत्वापि ॥ १ ॥ रामं
पतंगवंशप्रवरंमत्वासमभ्ययाचंत ॥ निजपीडकरक्षोगणनाशंसन्मार्गगाद्विजाःसर्वे ॥ २ ॥ त्रयीमूर्तिकुलोत्तंसोद्विजानांनिगमात्मनां ॥
अवनायमतिंचक्रेननचित्रंकुलोचितं ॥ ३ ॥ गच्छन्मार्गरुधोवीरोविराधस्याविरोधिनः ॥ शरान्सत्वदृदयेतस्यसानुजोनिजघानह ॥ ४ ॥
त्रिशूलायुधपूज्येसरणधीरोरघूद्वहे ॥ विहायतांतदासीतांशूलंचिक्षेपराक्षसः ॥ ५ ॥ ततःसंक्षोभितश्रीमद्रघुनायकसायकान् ॥ वर्द्धनं
प्राप्यतच्छूलंपपाताहोमहीतले ॥ ६ ॥ क्रुधाविराधोपितदासमेत्यस्कंधेनिधायाशुरघूद्वहौतौ ॥ समभ्यधावत्तदसिप्रपाताव्यापद्रुतंबाहुयुग
स्यदैन्यं ॥ ७ ॥ शाखिनांभूभृतांनृणांभंगकृन्मदभृद्वने ॥ वक्षस्यसुरनाशस्सरघुसिंहेनदारितः ॥ ८ ॥ भवरजनीचरइत्थंमुनिनाशप्तो
भवत्सतद्रूपः ॥ हरिणोदितेनकालाद्भवगात्रिर्नाशमापितातस्य ॥ ९ ॥ रक्षोरूपंविहायासौविहायश्चररूपभाक् ॥ ननामरामपादौतौजगा
मचानिजंपदं ॥ १० ॥ अपिशापःसतांश्रीशपादानुग्रहसौख्यदः ॥ मुनिशप्तोविराधोयत्प्रापप्रभुपदात्सुखं ॥ ११ ॥ धराधराकृतिभ्राज
त्तच्छरीरंधरावटे ॥ धाराधरनिभोधीरोधनुर्धरवरोन्यधात् ॥ १२ ॥ शरभंगाश्रमंप्रापशरकार्मुकधारकः ॥ दृष्टोदिष्टोदयःसाक्षान्मु
निनाप्रार्थितोपिच ॥ १३ ॥ अनाद्यविद्याकृतएषबंधोमुकुंदनष्टोममदीनबंधो ॥ त्वय्यास्मिदृष्टःसदयंयदाहंजहामिदेहंप्रविधायदाहं ॥१४॥
भ्रांतिभ्रांतस्यास्तांममसंस्थाचरणसन्निधौतवभोः ॥ इतिकांक्षतेतदादात्प्रभुर्निजामव्ययांसतांतस्मै ॥ १५ ॥ अथागतःसुतीक्ष्णस्याश्रमं
श्रमनिवारणः ॥ मुनिश्चापिपरामोदंकमलेश्वरतस्ततः ॥ १६ ॥ अभिख्ययासुतीक्ष्णोसावाकृत्यादुर्जनेहरिः ॥ पूर्वस्तुतपसाशांतःस्वभावा
देवचापरः ॥ १७ ॥ तेनसार्द्धंपरेद्युःसप्राप्तोगस्त्यतपोवनं ॥ सर्वागमफलंलब्धंराममेनेद्विजोत्तमः ॥ १८ ॥ तदाददौदिव्यधनुर्निषंगौरा
मायसोगस्त्यमुनिःप्रहर्षात् ॥ जग्राहसोनुग्रहकृत्परेशोभक्तेच्छयादुर्जनतर्जनाय ॥ १९ ॥ यदामुनिर्दिव्यधनुर्निषंगयुतस्तदाक्षत्रियता

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

धरोपि ॥ नोचेदिदानींसतुदक्षिणाशास्थितोपिनक्षत्रतयाकथंवा ॥ २० ॥ तमापृच्छ्यचवनंयातःपथिगृध्रंददर्शसः ॥ पितृमित्रमितिज्ञात्वा
प्रागात्पंचवटींप्रति ॥ २१॥ एकार्णवेभूद्वटपत्रएवनिद्रासुखस्यानुभवस्तुपूर्वं ॥ तद्वृक्षसंवाससुखंकथंस्यादितीवकिंपंचवटींनदागात् ॥२२॥
अनुजेनकृतांतत्रमनुजाकृतिरीश्वरः ॥ सुपर्णवाहनःसोपिपर्णशालामथाविशत् ॥२३॥ स्नानाद्यौरवशङ्क्यतिचददात्यपिदिव्यंततःप्रोक्ता॥
गोदेतितटेतस्यारममाणःसन्मुदंप्राप ॥ २४ ॥ ततःकतिपयेयातिकालेतंरमणाकृतिं ॥ भूत्वातुसुंदरांगीसारामंशूर्पणखाब्रवीत् ॥ २५ ॥
मांत्वृणुष्वेतिसोप्याहलक्ष्मणंवृणुसुंदरि ॥ गत्वाथलक्ष्मणंजाताथनिराशैवपुनर्ययौ ॥ २६ ॥ भूत्वाभीकापुनर्जाताप्यस्वीकारान्निशाचरी ॥
रामंप्राहकिमर्थंमांभ्रामयत्यधुनाभवान् ॥ २७॥ इदानीमिहकांतारेकांतामस्मामितेयतः ॥ इत्युक्त्वाभीषणाकारासीतांरोषेणसंययौ॥२८॥
लक्ष्मणोपितदारामाज्ञयाखङ्गधरोययौ ॥ तस्याःश्रोत्रयुगंनासांखङ्गेनव्यच्छिनद्रुषा ॥ २९ ॥ निशाचरीसारविवंशनाथजायाभवामीति
कृतप्रयत्ना ॥ अवापताभ्यामपमानमस्मान्महत्पदंहीनजनोनकांक्षेत् ॥ ३० ॥ मंदभाग्यप्रयत्नोयोविफलोप्यपमानकृत् ॥ श्रीनिवासंत
मिच्छंतीवैरूप्यंप्रापराक्षसी ॥ ३१ ॥ खरादीनांततःसेनाप्राप्ताशूर्पणखेरिता ॥ शूरवंशवरेणाशुसाभावंप्रापितारणे ॥ ३२ ॥ युक्ताशक्र
सहस्रैःपुण्यजनैर्वाहिनीखरादीनां ॥ साहरिकृतशरपाताज्जीवविहीनाबभूवाहो ॥ ३३ ॥ अनेकसंख्यानवरान्पलाशानेकेनसंख्येनवरः
पुमान्सः ॥ निनायसंस्थांनहिकेवलंतान्जनान्समस्तानपितद्वनस्थान् ॥ ३४ ॥ वार्तामादायेमांशूर्पणखासाजगामदशवदनं ॥ निजवै
रूप्यनिदानंकथितवतीसतुनिशम्यरुष्टोभूत् ॥ ३५ ॥ तस्यातिसुंदरींतांहररमणीमितिवचःसआकर्ण्य ॥ मारीचंमृगवपुषंतस्यामोहायसं
युयोजखलः ॥ ३६ ॥ शृंगीकनकमृगश्रेङ्कृषार्थंलोलुपाभवेत्स्त्रीति ॥ मत्वाभूत्तद्रूपोमारीचोमोहनायसीतायाः ॥ ३७॥ सातंदृष्ट्वातुवैदेही
देहिमेकांचनंमृगं ॥ तस्यावाचमितिश्रुत्वारामोमारीचमन्वगात् ॥ ३८ ॥ मृगतृष्णारतःसस्याद्योविधेयःस्त्रियाभवेत् ॥ इतिप्रबोधनार्था

Joint Project of the Rajwade Sanshodhak Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

यसतादृगभवद्विभुः ॥ ३९ ॥ दृष्ट्वारामंधनुर्बाणधरंदूरंगतोमृगः ॥ तमेवानुगतःसोरसंचरंश्चवनाद्वनं ॥ ४० ॥ वातायुरितितंमत्वाबाण
वाताशनःप्रभोः ॥ मारीचस्यापिबत्प्राणवातांस्तास्मिन्महावने ॥ ४१ ॥ हेलक्ष्मणधावहतोस्म्यनेनेत्युच्चैर्लपन्सनभुविसंपपात ॥ मत्वा
रवंराघवजंतदार्त्तावलादमुंप्रेषयनिस्मसीता ॥ ४२ ॥ भिक्षुवेषेणतद्रक्षःक्षितिजाहरणक्षमं ॥ जातंयातंपथेदृष्ट्वाक्रुद्धोगृध्रोरुरोधतत् ॥४३॥
विदेहस्यममाप्येनवैदेह्याहरणंवरं ॥ इतित्रासदशास्यंतंजटायुर्न्यहनाद्वलात् ॥ ४४ ॥ चक्रेयंरामविद्वेषंसीतांहत्वानिशाचरः ॥ गृध्रराट्
पक्षनाशाच्च वर्द्धयामासतंपुनः ॥ ४५ ॥ त्दृत्वापरस्त्रियंकृत्वाद्विजपक्षप्रणाशनं ॥ अवलंब्यपदंविष्णोरुच्चैर्गतिमवापसः ॥ ४६ ॥ जानकी
नीयमानासाकृष्यमूकास्थितान्कपीन् ॥ वीक्ष्योत्तरीयभागेनबध्वाभूषान्यविक्षिपत् ॥ ४७ ॥ सदारामरताभूमिजाताऽशोकवनेसती ॥
स्थापितानुक्षणंक्षीयमाणामोदविवर्जिता ॥४८॥ आयांतंसपरावृत्तोनुजंतंप्रभुसमब्रवीत् ॥ कुनःसैकाकिनीत्यक्तावहूनांमायिनांवने ॥४९॥
धावहालक्ष्मणाशुश्रामितिश्रुत्वातिभीतया ॥ प्रेरितोदर्शनायाहमागतःसंप्रतिप्रभो ॥ ५० ॥ आगत्यपर्णशालांतांसीताहीनांददर्शसः ॥
क्षेत्रज्ञोपिमम्क्षेत्रंकुत्रात्विमशोधयत् ॥ ५१ ॥ विशोधयन्तेवनंपयानोदशास्यसंजातपतत्रभंगं ॥ ददर्शगृध्रंतमपृच्छदेषवैकल्यहेतुंवद
पक्षिराज ॥ ५२ ॥ सचाववीद्भूमिसुतांगृहीत्वादशाननोसौगगनेनयातः ॥ रुद्धोमयातेनपतत्रनाशःकृतःप्रभोप्राणविनाशहेतुः ॥ ५३ ॥
इत्युक्त्वातंपुरोध्यायन्सच्चिदानंदमीश्वरं ॥ जडदेहंपरित्यज्यतत्स्वरूपंपरंययौ ॥ ५४ ॥ चक्रेरामस्ततोरण्येगृध्रस्याप्यौर्ध्वदेहिकं ॥
तस्मात्खगकुलेजातोद्विजोद्धृतिकरःखलु ॥ ५५ ॥ वैकल्यतोमित्रवधूकृतेविःपराजयंप्राप्यविराजमानः ॥ रामाद्विराजोविजनेविरूपा
त्सुरूपतोवापनिवापमीडयं ॥ ५६ ॥ अपिद्विजःसलोकेस्मिन्विहीनजातितांगतः ॥ दत्वाहंसगतिंतस्मैकृतोविप्रवरस्तदा ॥५७॥ पक्षहीनः
पदंविष्णोर्हंसानांदुर्लभंगतः ॥ अपिगृध्रोविधौजातेनुकूलेकिन्नसंभवेत् ॥ ५८ ॥ जगामाविपिनांतरंरघुवरःपुनर्दुःखितोविदेहदुहितुर्वि

(10)





शोधनपरःकबंधंपुरः ॥ ददर्शभुजयोर्गतावपिचतस्यतौराघवौविनिन्यतुरुभाववभावमपिखड्गतस्तत्क्षणात् ॥ ५९ ॥ रघुवरवारिदखर
तरवारिपतनतोभवत्कबंधस्य ॥ वर्द्धनमितितद्धेतोस्तद्वनमृषिभिःसमाश्रितंहर्षात् ॥ ६० ॥ शापपाशाद्विमुक्तंतंकृतवान्नहिंकिंवलं ॥ दृढै
र्निजगुणैःसद्योबद्धंचापिरघूद्वहः ॥ ६१ ॥ तद्राघवचरित्रंस्यात्कस्यनाश्चर्यकृद्यतः ॥ कृतेकबंधनाशेपिबहुजीवनवद्वनं ॥ ६२ ॥ गच्छतो
व्योमयानेनकबंधस्योपदेशतः ॥ शर्वरीशमुखोरामःशबर्याश्रममभ्यगात् ॥ ६३ ॥ पतितास्मिपादमूलेपावनमामुद्धराशुकरुणाब्धे ॥
इत्युक्तवतींरामःस्वानंदाब्धौनिमज्जयामास ॥ ६४ ॥ शबरींतोषयामासप्रसन्नैर्भक्तितोर्पितैः ॥ विप्रास्तथानयज्ञेशंकृतैर्वरतमैःसत्रैः ॥ ६५ ॥
नामोच्चरणान्नष्टंपापंतद्दर्शनात्कुतस्तिष्ठेत् ॥ स्वादुफलार्पणान्निपतःपुण्यफलान्यर्पितानिमोक्षार्थं ॥ ६६ ॥ प्रसन्नार्पणादभूत्साविप्रसन्ना
रघुवरप्रसादेन ॥ अत्रराविप्रवरेडयंप्रापहरेस्तत्पदंतदाशबरी ॥ ६७ ॥ वर्णत्रयीमुख्यनमेनतेनवर्णत्रयात्मप्रणवेनलक्ष्यं ॥ तदक्षरंवर्ण
विहीनजन्मासाप्रापतच्छ्रीहरिभक्तियोगात् ॥ ६८ ॥ आकाशगत्याभिजःशकुनिसुहृःसदात्रसत्यस्यां ॥ सीताशोधंकथयेदिनिकिंरामस्त
दाभ्यगात्पंपां ॥ ६९ ॥ रामलीलालताकांडःसंपूर्णत्वमितिपूर्ववत् ॥ इतिश्रीगंगाधरकृतौश्रीमद्रामलीलालतायामरण्यकांडः
समाप्तिमगमत् ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

(10A)

॥ श्रीगणेशायनमः ॥ रामःप्रफुल्लांबुजमालिनींतांहंसालिचक्रादियुतांसुनीरां ॥ सस्मारबाणैरभिताडितःसन्सस्मारसीतांसुनिरीक्ष्य
पंपां ॥ १ ॥ उपस्पृश्यनीरंतदातौसुधीरौगिरेर्ऋष्यमूकस्यपार्श्वंप्रवीरौ ॥ चरंतौभयान्नष्टचेष्टःसदिष्टोग्रहाध्यक्षसूनुःसमावेक्षतैनौ ॥ २ ॥
तज्ज्ञानायानभिज्ञेनसुग्रीवेणमारुतनंदनः ॥ सुग्रीवेणसमाज्ञप्तःप्राप्तःसमुनिवेषधृत् ॥ ३ ॥ नरोविवेकीप्रभुदर्शनार्होविकल्पयुक्तोनतथेतिबोद्धुं ॥
सवानरःसन्नपिपात्रमानिर्नराकृतिश्चापिमुनिर्बभूव ॥४॥ कौयुवांधनुर्धरौनिषंगिणौमौनवेषसहितौमनोहरौ ॥ अश्विनाविवतपस्विनौकुत
स्तावपृच्छदितिमारुतिस्तदा ॥ ५ ॥ प्रणमंतंहनूमंतंस्वीयवृत्तंन्यवेदयन् ॥ सुग्रीवव्यसनंसोपिगिरिंतौचसमानयत् ॥६॥ शाखाशिरोभिर्मृ
गयंतिसंतोयमेवराममनसामलेन ॥ शाखामृगाणामपिमित्रतामस्यैजगामगोत्रंसतुमृष्यमूकं ॥७॥ अभ्रातृयलस्त्वंव्यसनंसरामःकपीश्वरंसो
पिरघूद्वहंतं ॥ यदग्रजातादभवत्तदानीमन्योन्यसख्यंसमयाचतांतौ ॥८॥ तवाग्रजातंविनिहत्यसत्यंदास्यामितुभ्यंकपिराजराज्यं ॥ चकार
संधामितिरामभद्रस्ततोब्रवीत्सोपिकपीश्वरस्तं ॥९॥ सीताहरणकल्याणनागकारणसंगरे ॥ सहायःकपिभिःसार्धमस्मीत्थंसत्यसंगरः ॥१०॥
सीतोत्तरीयंचविभूषणानिप्रादर्शयद्राममसौकपींद्रः ॥ तान्येवसीतापरिमार्गणस्यसंसूचकानीतितदासमेने ॥ ११ ॥ अग्निमेवतदासख्य
साक्षिणंतौप्रचक्रतुः ॥ शुचिस्त्वंहिसदातस्यसर्वलोकेषुविश्रुतं ॥ १२ ॥ ज्ञातुंबलंसतस्यप्रादर्शयदुत्तमांगमपिसार्थं ॥ तत्पदलग्नंलग्न
कमभवत्किलदुंदुभेर्भावविमोक्षस्य ॥ १३ ॥ दशयोजनपर्यंतंक्षिप्रंतत्सन्निरीक्ष्यनातृप्यत् ॥ सुगलस्तालच्छिद्रंबाणेनैकेनचार्थयतरामं ॥१४॥
वेदेमहासारतयाप्रसिद्धः समाश्रितोहंसमुखैर्द्विजैर्यः ॥ बिभेदसप्राप्तिदाशरेणरामस्तदातांस्तृणराजसंज्ञान् ॥ १५ ॥ अथानेनसमा
हूतःपुरुहूतसुतोबली ॥ घोरंससंगरंकृत्वाददौतस्मैपराजयं ॥ १६ ॥ आकृत्याभक्तसादृश्यमापिभीतिनिवारकं ॥ यस्मात्सुग्रीवसा
दृश्याद्वालिनंनजघानतं ॥ १७ ॥ भ्रात्रादत्तांपराभूतिंप्राप्यखिन्नमनाहरिः ॥ अत्रवीद्युपेक्षातेजाह्मिांरात्रस्त्वयं ॥ १८ ॥ सांत्व

यित्वावचोभिस्तंधारयित्वागलेलतां ॥ रणायायोजयज्जातः स्वयंतरुतिरोहितः ॥ १९ ॥ हरिदासत्वलिंगंयोधत्तेगेयदिकामुकः ॥
हरिजातभयाद्धीनः सुग्रीवोत्रनिदर्शनं ॥ २० ॥ ज्यायांसमाहूयसस्नुनुस्नुनुश्चक्रेरणंघोरतरंतदानीं ॥ तिग्मेन बाणेनजघानकीशंसजा
नर्कोशोनगरुढवर्ष्मा ॥ २१ ॥ सुगलेनार्थितोवालिवधःसविफलोभवेत् ॥ प्रणमेच्चेदिदंमत्वातस्याभून्नाक्षिगोचरः ॥ २२ ॥ अंतर्धा
नेपुनर्हेतुर्वीरस्याभिमुखस्यते ॥ समेष्यसिबलंत्वालिन्निनिरुद्रवरःपरः ॥ २३ ॥ गहनागमभागावलोकनीयोस्मिनिश्चयात् ॥ विषयो
पभुजामित्रभूतद्वेष्टातुनकश्चित् ॥ २४ ॥ एवंप्रबोधनायैषशरणागतवत्सलः ॥ रामोगांतर्हितोभूत्वावालिनोनाक्षिगोचरः ॥ २५ ॥ म
माकृतिधरस्यस्याद्वेष्योयःसाधुवैरकृत्॥नाहंतादृगिदंबोद्धुंतदक्षिगतोभवत् ॥२६॥ योलोकबंधुजातस्यैवैरिस्यात्काममोहितः॥कलावदृश्य
रूपेणहन्म्येवंबोधितंननु ॥ २७ ॥ तादृशंवालिनंरामःकलहेसुगलस्यसः ॥ निजघानतदावृक्षांतर्हितोभक्तवत्सलः ॥ २८ साधुवैराप
राधेनहंतायंदीनवत्सलः ॥ इतिसंचिंत्यकःकुर्यादनयातंकमीश्वरे ॥ २९ ॥ भक्तकार्यैधिकासाक्तिःस्वकार्यादितिबोधितुं ॥ सस्वारिमा
रणात्पूर्वंसुगलारिंव्यनाशयत् ॥ ६० ॥ पचत्वमाप्तंकमितुर्निरीक्ष्यरोदितारावहुशोकयुक्ता ॥ अद्वैतबोधंनददौप्रशांतिंरामःसतस्यैभू
शतप्ततन्वै ॥ ६१ ॥ रामाज्ञयालक्ष्मणएवराज्येसमभ्यषिंचत्सुगलंतदानीं ॥ तमंगदंतातसमंबलेनतद्यौवराज्येविनयेनयुक्तं ॥ ३२ ॥
अपिवानराःप्रियास्तेजातानरपुंगवस्यरामस्य ॥ नीचेष्वप्यासक्तिःसतःकुर्वंत्यकैतवेष्वानिशं ॥ ३३ ॥ संगृह्यंतेवीरैःशत्रुविनाशायनि
र्मलाभल्लाः ॥ इतिकिंश्रीरघुवीरः प्रीतिंचक्रेच्छभल्लेषु ॥ ३४ ॥ वियोगतप्तःफलमूलतृप्तःप्रवर्षणेभूभृतिरामभद्रः ॥ समावसन्मासच
तुष्टयंसभ्रात्रासरात्रावपिजायतैव ॥ ३५ ॥ ततोनुजंप्राहरघुप्रवीरोवलीमुखेशोपिबभूवसीतः ॥ गच्छत्वमेनंवदाविस्मृतःकिंत्वदग्रजोयेनह
तःशरेण ॥ ३६ ॥ वाणीमाकर्ण्यरामस्यप्रणम्याशुसलक्ष्मणः ॥ किष्किंधांधीरआगत्यप्राहधामनिधेःश्रुतं ॥ ३७ ॥ अस्मृत्वातं

(११ ब)

रामराज्ञांरत्यैभवान्यतःस्मरति ॥ तस्योग्रशीलतातेनज्ञातैवेतिमनसिमेभाति ॥ ३८ ॥ लक्ष्मणंसांत्वयामाससुग्रीवःश्लक्ष्णयागिरा ॥
तेनसार्द्धंद्रुतंराममभिवंदितुमाययौ ॥ ३९ ॥ प्रणम्यसप्रार्थयताशुरामंक्षमस्वमेमंतुमिमंमहात्मन् ॥ वलीमुखान्पश्यविभोत्वदाज्ञाध
रानिमान्नाशकरान्परेषां ॥ ४० ॥ अविदेहंकपींद्राणांसंघंपश्यरघूद्वह ॥ विदेहमेवतंब्रूहियोमेदद्याद्विदेहजां ॥ ४१ ॥ येकेपिसीता
परिमार्गणार्थंशाखामृगादिक्त्रितयेप्रयाताः ॥ प्रेम्णैवरामेर्णनिहितेनजग्मुःकृतार्थतांतेनतुतांविलोक्य ॥ ४२ ॥ सर्वांसुशाखासुफलं
विमृग्यगतागतंचाप्यनुभूयजाताः ॥ शाखामृगाद्वैतविवर्जनेनहरिस्वरूपाहरिसैनिनोपि ॥ ४३ ॥ भल्लूकराजंशरभंप्रवीरंमहाबलंवायु
सुतंचमैंदं ॥ नलांगदौतौद्विविदंबलिष्ठंसंप्रेषयामाससदक्षिणाशां ॥ ४४ ॥ गच्छंतंमारुतिंप्राहश्रीरामोमेंगुलीयकं ॥ अभिज्ञानाय
सीतायैदीयतामितितद्ददौ ॥ ४५ ॥ अलब्धसीतापरिमार्गणास्तेसंतोभ्रमंतोपिवनानिकीशाः ॥ अवेक्ष्यतंराक्षसनचिमेकंयुद्धायसन्नद्ध
तयाभ्यतिष्ठन् ॥ ४६ ॥ धात्रीजाताहरणंकृत्वास्मान्पीडयितुमरण्यगतः ॥ मत्वेतितंवनौकारावणबुध्याजघानवालिसुतः ॥ ४७ ॥ बृह
दारण्यगतानप्यजयच्छाखामृगांस्तंडकैत्र ॥ विष्णुपदगदर्शनतोलब्धामृतमपियुर्हितेशांतिं ॥ ४८ ॥ गुहांप्रविष्टाददृशुःपुरंतन्मह
त्तरंकांचननिर्मितंते ॥ स्वयंप्रभांयोगनिविष्टचित्तांदृष्ट्वापरंविस्मयमाप्रवंतः ॥ ४९ ॥ लब्धातिथ्यास्ततस्तस्याआज्ञयातेबहिर्गताः ॥
विंध्याचलमगुस्तूर्णंसीताशोधनतत्पराः ॥५०॥ सीतोपलब्धिहीनास्तेकीशाःसुग्रीवनिग्रहं ॥ शंकमानाभृशंतत्राश्चक्रुःप्रायोपवेशनं ॥५१॥
तेदाक्षिणस्यांदिशिधर्मराजंसंप्रष्टुकामाइवमंददेहं ॥ संत्यज्यलब्धुंजवनंसुसूक्ष्मंसमुद्यतागृध्रमकीर्तयंश्च ॥ ५२ ॥ एकोपिपंचस्त्वयनेषु
शोधंकुर्यादितिप्राप्तुमिमेतदानीं ॥ समस्तुवंस्तेननुपंचतांतांजटायुषःस्वर्गगतस्यकीशाः ॥ ५३ ॥ समाकर्ण्यवार्तांतुगृध्रस्यतस्याग्रजःशोक
युक्तःससंपातिनामा ॥ निवापंयविद्यायदत्वाप्लवंगान्समाश्रावयद्भूमिजायाःप्रवृत्तिं ॥ ५४ ॥ वार्ताकथनात्तेषांसपक्षहीनोपिपक्षतामग

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com